लक्ष्यं सिद्धमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2022-23

DINABANDHU MAHAVIDYALAYA
Estd.-1947
CENTRAL LIBRARY

## SANACOR11T-SANSKRIT (CC11)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्

क-विभागः

1. अधोलिखितेषु प्रश्नेषु यथेच्छं <u>प्रश्नद्वयं</u> समाधेयम्। 10×2 = 20

(क) अग्निदेवस्य निर्वचनमुल्लिख्य वैशद्येन तत्स्वरूपमालोच्यताम्। 3+7

(ख) हिरण्यगर्भसूक्तस्य कः ऋषिः ? तत्र वर्णितं दार्शनिकतत्त्वं ग्रन्थोद्धृतिपूर्वकं प्रतिपाद्यताम्। 1+9

(ग) अथर्ववेदस्य कस्मिन् काण्डे भूमिसूक्तं दृश्यते ? तत्सूक्तस्य काव्यसौन्दर्यं परिवेशचिन्तनं च ऋषिमानसे यथा परिस्फुटं तथा विव्रियताम्। 1+9

(घ) शिवसंकल्पसूक्तस्य नामकरणे किं बीजम् ? तत्र वर्णितं मनसः स्वरूपं विशदतया पर्यालोच्यताम्। 2+8

2. अधःप्रदत्तेषु मन्त्रेषु ऋषिच्छन्दोदेवताविनियोगनिर्देशपुरःसरं यथेच्छं <u>मन्त्रद्वयं</u> व्याख्येयम्। 5×2 = 10

(क) अक्षैर्मा दीव्यः कृषिमित् कृषस्व
वित्ते रमस्व बहु मन्यमानः।
तत्र गावः कितव तत्र जाया
तन्मे वि चष्टे सवितायमर्यः॥

(ख) हिरण्यगर्भः समवर्तताग्रे
भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम॥

(ग) स नः पितेव सूनवेऽग्ने
सूपायनो भव
सचस्वा नः स्वस्तये॥

(घ) यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु।

यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु॥

3. अधो लिखितेषु मन्त्रेषु यथेच्छमेकस्य मन्त्रस्य पदपाठो विधेयः। 5×1 = 5

(क) राजन्तमध्वराणां

गोपामृतस्य दीदिविम्।

वर्धमानं स्वे दमे॥

(ख) सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।

सा नो भूतस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु॥

अथवा

अधो लिखितेषु विनियोगवाक्येषु यथेच्छमेकं व्याख्येयम्। 5×1 = 5

(ग) अग्नीषोमप्रणयने उपत्वाग्न इत्यादिकोऽनुवचनीयस्तृचः।

(घ) गतः सूक्तविनियोगः।

खं-विभागः

4. अधः प्रदत्तेषु विषयेषु यथेच्छमेकमाश्रित्य टिप्पणी लिख्यताम्। 5×1 = 5

(क) वैदिकलेट्लकारः।

(ख) वैदिकतुमर्थकप्रत्ययः।

(ग) अवग्रहः।

DINABANDHU MAHAVIDYALAYA Estd.-1947 * CENTRAL LIBRARY *

5. अधो लिखितेषु प्रश्नेषु यथेच्छं पञ्चप्रश्नाः समाधेयाः। 2×5 = 10

(क) गवामित्यस्य वैदिकरूपं किम् ? केन सूत्रेण तत् साध्यते ?

(ख) 'परमे व्योमन्' इत्यत्र 'व्योमन्' इति पदं कथं जायते ?

(ग) 'मादयध्यै' 'पिबध्यै' इति वैदिकपदद्वयस्य लौकिकरूपं लिख्यताम्।

(घ) 'दृशे विख्ये च' इति सूत्रस्य कोऽर्थः ?

(ङ) स्वरितस्वरस्य किं लक्षणम् ?

(च) पदपाठः केन विरचितः ? विकृतिपाठः कतिविधः ?

(छ) वैदिकस्वरः कतिविधः ? के च ते ?

——×——